योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ००८

अष्टमः सर्गः ८

श्रीराम उवाच ।

कयैतज्ज्ञायते युक्त्या कथमेतत्प्रसिध्यति ।

न्यायानुभूत एतस्मिन्न ज्ञेयमवशिष्यते ।। १

श्रीवसिष्ठ उवाच ।

बहुकालमियं रूढा मिथ्याज्ञानविषूचिका ।

जगन्नाम्न्यविचाराख्या विना ज्ञानं न शाम्यति ।। २

वदाम्याख्यायिका राम या इमा बोधसिद्धये ।

ताश्चेच्छृणोषि तत्साधो मुक्त एवासि बुद्धिमान् ।। ३

नो चेदुद्वेगशीलत्वादर्धादुत्थाय गच्छसि ।

तत्तिर्यग्धर्मिणस्तेऽद्य न किंचिदपि सेत्स्यति ।। ४

योऽयमर्थं प्रार्थयते तदर्थं यतते तथा ।

सोऽवश्यं तदवाप्नोति न चेच्छ्रान्तो निवर्तते ।। ५

साधुसंगमसच्छास्त्रपरो भवसि राम चेत् ।

तद्दिनैरेव नो मासैः प्राप्नोषि परमं पदम् ।। ६

श्रीराम उवाच ।

आत्मज्ञानप्रबोधाय शास्त्रं शास्त्रविदां वर ।

किं नाम तत्प्रधानं स्याद्यस्मिञ्ज्ञाते न शोच्यते ।। ७

श्रीवसिष्ठ उवाच ।

आत्मज्ञानप्रधानानामिदमेव महामते ।

शास्त्राणां परमं शास्त्रं महारामायणं शुभम् ।। ८

इतिहासोत्तमादस्मताद्बोधः प्रवर्तते ।

सर्वेषामितिहासानामयं सार उदाहृतः ।। ९

श्रुतेऽस्मिन्वाङ्मये यस्माज्जीवन्मुक्तत्वमक्षयम् ।

उदेति स्वयमेवात इदमेवातिपावनम् ।। १०

स्थितमेवास्तमायाति जगद्दृश्यं विचारणात् ।

यथा स्वप्ने परिज्ञाते स्वप्नादावेव भावना ।। ११

यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ।

इमं समस्तविज्ञानशास्त्रकोशं विदुर्बुधाः ।। १२

य इदं श्रृणुयान्नित्यं तस्योदारचमत्कृतेः ।

बोधस्यापि परं बोधं बुद्धिरेति न संशयः ।। १३

यस्मै नेदं त्वरुचये रोचते दुष्कृतोदयात् ।

विचारयतु यत्किंचित्सच्छास्त्रं ज्ञानवाङ्मयम् ।। १४

जीवन्मुक्तत्वमस्मिंस्तु श्रुते समनुभूयते ।

स्वयमेव यथा पीते नीरोगत्वं वरौषधे ।। १५

श्रूयमाणे हि शास्त्रेऽस्मिञ्छ्रोता वेत्त्येतदात्मना ।

यथावदिदमस्माभिर्ननूक्तं वरशापवत् ।। १६

नश्यति संसृतिदुःखमिदं ते

स्वात्मविचारणया कथयैव ।

नो धनदानतपःश्रुतवेदै-

स्तत्कथनोदितयत्नशतेन ।। १७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे सच्छास्त्रनिरूपणं नामाष्टमः सर्गः ।। ८ ।।